Nikaṣa, Vol.-1, Issue-4, 2012, Pages 7-10 ISSN: 2277-6826

# चण्डकौशिकनाटकस्य नामकरणविमर्शः

राजीव कुमार 'त्रिगर्ती'*

rajeevtrigarti@gmail.com

काव्यनाटकेषु तेषां नामकरणस्य अतीव महत्त्वमस्ति। नामकरणमनवीक्ष्य रचनाया विषये धारणैका मनसि स्थानं निदधाति। पठनादवेक्षणात् वा पूर्वमेव नामकरणं विना रचनायाः कथावस्तोः नायकनायिकादि सन्दर्भे कोऽपि किमपि कथयितुम् समर्थः न भवति। एतादृश्यां स्थितौ नाटकादिं पठित्वा एव नायकादिविषये कथावस्तोः सन्दर्भे वा मनसि एका स्पष्टधारणा निर्मीयते। वस्तुतः नामकरणेन एव रचनाया विषये सारल्येन ज्ञानं भवति। रचनायाः सम्बन्धः कीदृशेषु पात्रेषु कथावस्तोः रसेन वा अस्ति इति तु नामकरणेनैव अनुमीयते । अतः कस्याश्चिदपि रचनायाः सन्दर्भे नामकरणस्य महत्त्वम् स्पष्टमेव।

रूपकाणां नामकरणसन्दर्भे साहित्यदर्पणकारेण विश्वनाथेन निजमतम् अनेन प्रकारेण प्रकटितम् यत् रूपकाणां नाम तेषां कथावस्तु-अर्थ-नायकनाम-नायिकानाम-प्रकरणादीनाम् अनुसारेणैव स्थापयितव्यम्।[१]

अतः स्पष्टमस्ति यत् नाटके प्राधान्येन निर्दिष्टं तस्य प्रकाशनापेक्षत्वमाधारितमेव नाटकस्य नामकरणं भवेत्। यथा रामाभ्युदयादि। प्रकरणादिषु नायिकानायकाख्या नायिकाया नायकस्य वा नाम्ना तेषां नामकरणम् प्रयोक्त कर्तव्यव्यम्। यथा मालतीमाधवादि। सट्टकादीनां नायिकासंज्ञाविहितं नामकरणमपेक्षितम्। यथा रत्नावलीकर्पूरमञ्जर्यादि।

नाटकस्य प्रमुखघटनाऽऽधारितम् नामकरणलक्षणमभिलक्ष्य तत्र प्राथम्येन कानिचित् नामानि सन्ति- कालिदासस्य अभिज्ञानशाकुन्तलम्, भट्टनारायणस्य वेणीसंहारम्, शूद्रकस्य मृच्छकटिकम् च। नाटकस्य नामकरणम् प्रकरणाख्यानानुरूपमपि भवितुमर्हति। प्राधान्येन निर्दिष्टा घटना या नामकार्यार्थम् प्रयुज्यते यदि सा नायकस्य वा नायिकायाः युक्ता स्यात् तर्हि नायकनायिकयोः नामोल्लेखः अपि तत्र क्रियते। 'अभिज्ञानशाकुन्तलम्' 'स्वप्नवासवदत्तम्' आदिनाटकेषु नायिकानामोल्लेखः न केवलं अभिज्ञानेन शाकुन्तलायाः तथा स्वप्नेन वासवदत्तायाः सम्बन्धप्रकटनार्थमेव अपितु गर्भार्थप्रकाशनद्वारा एताभिः घटनाभिः सह नायिकानां सम्बन्धं प्रस्तौतुम्।

* गाँवः लंघू, डाकघरः गांधीग्राम, वायाः बैजनाथ, जिलाः काँगड़ा, हि०प्र० १७६१२५, फोन- ०९४१८१९३०२४

[१] नाम कार्यं नाटकस्य गर्भितार्थप्रकाशकम्।
नायिकानायकाख्यानात् संज्ञाप्रकरणादिषु।
नायिकासट्टकादीनां नायिकाभिर्विशेषणम्।। साहित्यदर्पण ६ . १४२-१४३

आर्यक्षेमीश्वरस्य 'चण्डकौशिकम्' इति नाटकस्याध्ययनेन इदं स्पष्टं ज्ञायते यत् अस्य नामकरणमपि नाटकस्य मूलकथायाः यत् विवेच्यं तदनुकूलमेव प्रयुक्तम्। चण्डः (अत्यन्त-कोपनः), कौशिकः (कुशिकनन्दनो विश्वामित्रः) अर्थात् यस्मिन् नाटके अत्यन्तेन क्रोधेन युक्तः कुशिकनन्दनः विश्वामित्रः पात्ररूपेण वर्तते, तं कुशिकनन्दनमाधारिता च घटना यस्मिन् नाटके विस्तरेण प्राधान्येन च उपलभ्यते 'चण्डकौशिकम्' इति नामकरणमुचितं नाटकस्य। पौराणिकेषु कथानकेषु उपजीव्यरूपेणोपलभ्यते कुशिकनन्दनविश्वामित्रस्य हरिश्चन्द्रस्य च कथा। नाटकेऽस्मिन् गर्भितार्थो नाट्यगुणानुवर्ती समायोजितो विद्यते। विश्वामित्रः हरिश्चन्द्राय क्रुध्यति। क्रोधस्य कारणं यादृशं पौराणिकाख्यानेषु उल्लिखितं तादृशमेव किञ्चित् भेदमाश्रित्य आर्यक्षेमीश्वरेणापि 'चण्डकौशिकम्' इति नामाख्ये नाटके वर्णितम्। क्रोधपरिणामेनैव कौशिकः हरिश्चन्द्रस्य सम्पूर्णं राज्यं याचते। दाने प्राप्तराज्यः कुशिकनन्दनः सम्प्रति दक्षिणां प्राप्तुकामः हरिश्चन्द्रात् राज्यदानादतिरिच्य लक्षसुवर्णमुद्राणां कामनां करोति। पत्नीपुत्रसहितं हरिश्चन्द्रमपि विक्रेतुं बाध्यं करोति। कौशिकस्य कोपाधारितं नाटकमिदमित्यनेन अस्य "चण्डकौशिकम्" इति नामकरणमुचितमेव प्रतीयते तथापि तत्रैव काश्चन् त्रुटयः परिदृश्यन्ते। तासां संक्षेपेण प्रतिपादनमपि अत्रापेक्षितम्।

प्रथमतो नामकरणात् न तत्र ज्ञायते यत् नाटकेऽस्मिन् कस्याः घटनायाः प्रामुख्येन वर्णनमस्ति, कारणं तत्र पौराणिकाख्यानेषु विश्वामित्रस्य कुपितस्वभावस्य स्थले-स्थले निदर्शनं वर्तते। पुराणेषु अनेकेषु स्थलेषु कौशिकस्य चण्डत्वं दृष्टिपथे आयाति।

हरिश्चन्द्रः नाटकस्य नायकः। तस्यैव दानवीरतायाः सत्यवीरतायाः धर्मवीरतायाः च प्रकटनं पञ्चाङ्केषु निबद्धेऽस्मिन्नाटके आर्यक्षेमीश्वरेण प्रथमाङ्कात् समाप्तिपर्यन्तं कृतम्। तथापि नायकस्य नाम्ना नाटकस्य नाम अकृत्वैव हरिश्चन्द्रस्य दान-वीरता-धर्मादिसम्बन्धिप्रमुखघटनानामपि उल्लेखार्थम् कुशिकनन्दनस्य चण्डत्वमाधारितम् "चण्डकौशिकम्" इत्यभिधानं प्रदत्तम्। हरिश्चन्द्रस्तु नायकः, तेनयुक्तं नाम नाटकस्य अपेक्षितमासीत्। अत्र विश्वामित्रः नाटकस्य प्रतिनायकरूपेण आचरति। तस्य क्रोधमधिकृत्य तस्यैव नाम्ना नाटकस्य नामकरणे औचित्यं किम्? सत्यमार्गानुयायी नायकः निजवचनमनुपालयन् बहुपरीक्षितः सफलीभूय बहिर्निस्सरति। ताः घटनाः परीक्षाश्च नायकेन सह योजयित्वा प्रतिनायकस्य क्रोधं सर्वोपरि संस्थाप्य नाटकस्य नामकरणयोजना तु उचिता न प्रतीयते।

अस्मिन् सन्दर्भे प्रो. रामजीउपाध्यायेन[१] "चण्डकौशिकम्" नामाख्यनाटकस्य नामकरणं प्रति निजाऽऽस्था न प्रकटिता। निजमतं प्रकटयितुं सः संकेतयति यत् अस्य नाटकस्य नामकरणं हरिश्चन्द्रेण समन्वितं भवेत् न तु चण्डेन विश्वामित्रेण समन्वितम्।

[१] मध्यकालीन संस्कृत नाटक - रामजी उपाध्याय, संस्कृत परिषद्, सागर विश्वविद्यालय, सागर, १९७४ पृष्ठ १३१

अस्मिन्नेव सन्दर्भे प्रो. रामजीपाण्डेयस्य मतोपस्थापनानन्तरं पक्षमेकमाश्रित्य अस्याः शंकायाः निराकरणं भवति। 'कथावस्तोः रचनानन्तरं नाटकस्य नामकरणं करणीयम् अथवा नामकरणानन्तरं कथावस्तुनः संयोजना भवेत्। द्विविधप्रक्रियाभ्यां तत्र न अन्तरविशेषः आगच्छति। परन्तु समीचीनं तु तदा भवेत् यत् कथावस्तुनः रचनानन्तरमेव नाटकस्य नामकरणं स्यात्। कथावस्तुनः रचनाकाले मध्ये मध्ये केचन् एतादृङ् नवीना व्यापारा आगच्छन्ति यैः नामकरणस्य विषये निर्णेतुं सुविधा भवति। ऐतिहासिकनाटकेषु पात्रस्यापि प्रधानता अभिव्यज्यते परन्तु प्रायश इदं भवति यन्नाटकस्य प्रकृतिः पात्रस्य नामोल्लेखेन तादृशी स्पष्टा न भवति यादृशी कस्यापि विशेषघटनया भवति। प्रमाणार्थम् 'उरुभंगम्' इति नाटकस्य प्रधान-पात्रं भीमसेनः अस्ति, अस्मात् कारणात् अस्य नाटकस्य नाम 'भीमसेन' इत्यपि भवितुमर्हति। परन्तु नाटकेस्मिन् उरुभंगः तादृशी विशिष्टा घटना वर्तते यया 'उरुभंगम्' नामकरणमेव उचितं ज्ञायते। तेनैव प्रकारेण 'अभिज्ञान-शाकुन्तलम्' नाटकस्य नाम दुष्यन्तनाम्ना शकुन्तलानाम्ना वा न कृतं, प्रत्युत अस्य नाम मुद्रिका अभिज्ञानेन युक्तम् अभवत्। वस्तुतः समस्तघटनायाः प्रवाहस्याधारस्तु मुद्रिकायाः अभिज्ञानमेव अस्ति।[१]

विषयस्योपरि डॉ. रामजी पाण्डेयेनोक्तम् "नाटकस्य नामकरणं तु एतादृशं भवेत् येन सामाजिकः नामश्रवणमात्रेणैव विषयस्य आभासं प्राप्नुयात् तथा च सः नाटकं द्रष्टुं उत्कण्ठितो भवेत्। पौराणिककथानकाऽऽधारितानाम् ऐतिहासिकानां च नाटकानां नामानि प्रायशः विशिष्टव्यक्ति-स्थान-घटनाभिरेव प्रसिद्धिं गच्छन्ति। तद्भिन्नं मौलिकेषु सामाजिकनाटकेषु च पात्रस्थानयोः महत्त्वं तिरोहित्वा परिणामानुकूलमेव नामकरणम् उचितं उपादेयं च सिद्ध्यति। नाटकेषु नामकरणसंरचना एतादृशी आकर्षणाऽऽधायिनी स्यात्, यत् तस्याः मोहवशनिबद्धो दर्शकः एतेषां रसोपभुक्त्यर्थं प्रेक्षागृहमागच्छेत्।"[२]

डॉ. रामजी पाण्डेयस्य मतमिदं आधारीकृत्य 'चण्डकौशिकम्' नाटकस्य नाम्न उपरि यदि विचारः क्रियेत तदा कथञ्चिदपि नाटकस्य नाम अनुचितं वा असंगतं वा न प्रतीयते। 'चण्डकौशिकम्' इति नाममात्रेणैव नाटके अन्तर्निहितायाः कथायाः मूलविषयस्य च आभासः प्रतीयते। डॉ. पाण्डेयेन[३] पौराणिककथानकाधारितानाम् ऐतिहासिकानां च नाटकानां नामकरणं विशिष्टव्यक्तिभिः स्थलैश्च सम्बन्धितं स्यात्, इति कथितम्। यदि नाटककारेण नाटकस्य गर्भे समाहिताः प्रमुखघटनाः नाटकस्य नामकरणाय प्रयुक्ताः तर्हि न कदाचित् तत्र तस्य त्रुटिः, अपितु एतादृशेन नामकरणेन तस्य विशदा दृष्टिरेव सिद्ध्यति। अतः आर्यक्षेमीश्वरविरचितनाटकस्य 'चण्डकौशिकम्' इति नामकरणम् उचितमेव, न तत्र शंङ्का कार्या।

---

[१] भारतीय नाट्य सिद्धान्तः उद्भव और विकास, पृष्ठ - ५९१

[२] तदेव, पृष्ठ - ५९२

[३] तदेव, पृष्ठ - ५९२

## सन्दर्भसूची

१. उपाध्याय, रामजी, १९७४. मध्यकालीन संस्कृत नाटक, संस्कृत परिषद्, सागर विश्वविद्यालय, सागर।

२. पाण्डेय,रामजी, १९८२. भारतीय नाट्य सिद्धान्तःउद्भव और विकास, बिहार राष्ट्रभाषा परिषद्, पटना।